This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2458

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2458 विषय धर्मशास्त्र

नाव कार्तीक महात्म्य

लेखक/लिपीकार ....

पृष्ठ 16 काळ .... पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2458

॥ अथ कार्तिकमाहात्म्य प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रियःपतिमथामंत्र्य गते देवर्षिसत्तमः हर्षोत्फुल्लानना सत्या वासुदेवंत
दाब्रवीत् १ सत्योवाच धन्यास्मिकृतकृत्यास्मि सफलंजीवितंमम मज्जन्मनि निदानेच धन्यौ तौ पितरौ मम २
यौमांत्रैलोक्यसुभगांजनयामासतुर्ध्रुवम् षोडशस्त्रीसहस्राणांवल्लभाहंयतस्तव ३ यस्मान्मयादिपुरुषःकल्पवृक्ष
समन्वितः यथोक्तविधिनासम्यङ्नारदायसमर्पितः ४ यद्वार्तामपिजानंतिभूमिसंस्थानजंतवः सोयंकल्पद्रुमोगे
हेसदांतिष्ठतिचांगणे ५ त्रैलोक्याधिपतेश्चाहंश्रीपतेरतिवल्लभा अतोऽहंप्रष्टुमिच्छामि किंचित्त्वां मधुसूदन
६ यदित्वं मत्प्रियकरः कथयस्वात्रविस्तरं श्रुत्वातच्चपुनश्चाहं करोमि हितवात्मनः ७ यथाकल्पंत्वयादेव
वियुक्तास्यांनकर्हिचित् सूतउवाच ॥ इतिप्रियावचः श्रुत्वास्मेरास्यःसबलानुजः ८ सत्याकरंकरेधृत्वाऽगमत्कल्पत
रोस्तलम् निषिध्यानुचरंलोकंसविलासःप्रियान्वितः ९ प्रहस्यसत्यामामंत्र्य प्रोवाचजगतांपतिः तत्प्रीतिपरितोषोत्थ
लसत्पुलकितांगकः १० श्रीकृष्णउवाच नमेत्वत्तःप्रियतमाकाचिदन्यानितंबिनी षोडशस्त्रीसहस्राणांप्रियाप्राण
समाह्यसि ११ त्वदर्थेदेवराजोपि विरुद्धो दैवतैःसह त्वयायत्प्रार्थितंकांते शृणुतच्चमहाद्भुतम् १२ अदेयमपिवाका
र्यमकथ्यमपियत्पुनः तत्करोमिकथंप्रश्नंकथयाभिनमप्रिये १३ पृच्छस्वसर्वंकथयेयत्तेमनसिवर्तते सत्योवाच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानंव्रतंतपोवापिकिंतुपूर्वंकृतंमया १४ येनाहंमर्त्यजामर्त्यैर्भावातीताभवन्किल तवांगार्धहरानित्यंगरुडासनगामि
नी १५ इंद्रादिदेवतावासमागमंत्यात्वयासह अतस्त्वांपरिपृच्छामिकिंकृतंतुमयाशुभम् १६ भवांतरेचकिंशीलाका
चाहंकस्यकन्यका श्रीकृष्णउवाच शृणुष्वैकमनाःकांतेयथात्वंपूर्वजन्मनि १७ पुण्यव्रतंकृतवतीतत्सर्वंकथयामि
ते आसीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः १८ आत्रेयोदेवशर्मेतिवेदवेदांगपारगः आतिथेयोग्निशुश्रूषीसौर-
व्रतपरायणः १९ सूर्यमाराधयन्नित्यंसाक्षात्सूर्यइवापरः तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता २० अपुत्रःसस्व
शिष्यायचंद्रनाम्नेददौसुताम् तमेवपुत्रवन्मेनेसचतंपितृवद्वशी २१ तौकदाचिद्वनंयातौकुशेध्माहरणार्थिनौ महा
द्रिपादोपवनेचेरतुस्तावितस्ततः २२ तावुभौराक्षसंघोरमायांतंतमपश्यताम् भयविह्वलसर्वांगावसमर्थौपलायि
तुम् २३ निहतौरक्षसातेनकृतांतसमरूपिणा तौतत्क्षेत्रप्रभावेणधर्मशीलतयापुनः २४ वैकुंठभुवनंनीतौमद्गु-
णैर्मत्समीपगैः यावज्जीवंतुयत्ताभ्यांसूर्यपूजादिकंकृतम् २५ तेनाहंकर्मणाताभ्यांसुप्रीतोह्यभवंकिल शैवाःसौरा
श्चगाणेशावैष्णवाःशक्तिपूजकाः २६ मामेवप्राप्नुवंतीहवर्षाभिःसागरंयथा एकोऽहंपंचधाजातःक्रियया नामभिःकि
ल २७ देवदत्तोयथाकश्चित्पुत्राद्याह्वाननामभिः २८ ततश्चतौमद्भवनाधिवासिनौविमानयानौरविवर्चसावुभौ मत्तुल्यरूपौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममसन्निधानगौदिव्यांगनाचंदन भोगभोगिनी २९ इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येकृष्णसत्यासंवादे प्रथमोध्यायः॥
१ श्रीकृष्णउवाच॥ततोगुणवतीश्रुत्वारक्षसानिहताबुभौ पितृभर्तृजदुःखार्ताकरुणंपर्यदेवयत् १ गुणवत्युवाच
हानाथहापितस्त्यक्त्वागच्छथः क्वमयाविना बालाहंकिंकरोम्यद्यह्यनाथाभवतोर्विना २ कोनुमामास्थितांगेहे भोजना-
च्छादनादिभिः अंकिंचित्कुशलांस्नेहात्पालयेत्पतिदूषिताम् ३ क्वयास्यामिक्वतिष्ठामिकिंकरोमियथाघृणं विधात्रा हाह
तास्म्यद्यकथंजीवामिबालिशा ४ श्रीकृष्णउवाच एवंबहुविलप्यार्थकुररीवभृशातुरा हतभाग्याहतस्वखाहताशाहत
जीविता ५ शरणंकंप्रयाम्यद्ययोमेदुःखंप्रमार्जति पपातभूमौविकलारंभावातहतायथा ६ निरादाश्वास्यसाभूयोविल
प्यकरुणंबहु निमग्नाशोकजलधौदुःखितासमवर्तत ७ सागृहोपस्करान्सर्वान्विक्रीताशुभकर्मतत् तयोश्चक्रेयथाश
क्तिपारलोक्यांयथाक्रियाम् ८ तस्मिन्नेवपुरेचक्रेवासंप्रभृतजीविनी विष्णुभक्तिपराशांतासत्यशौचाजितेंद्रिया ९
व्रतद्वयंमयासम्यगाजन्ममरणात्कृतम् एकादशीव्रतंसम्यक् सेवनंकार्तिकस्यच १० एतद्व्रतंद्वयंकांतेममातीवप्रियंकरम्
भुक्तिमुक्तिकरंपुण्यंपुत्रसंपत्तिदायकम् ११ कार्तिकेमासियेनित्यंतुलासंस्थेदिवाकरे प्रातःस्नास्यंतितेमुक्तामहा
पातकिनोपिच १२ स्नानंजागरणंदीपंतुलसीवनपालनम् कार्तिकेमासिकुर्वंतितेनराविष्णुमूर्तयः १३संमार्जनंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्णुगृहेस्वस्तिकादिनिवेदनम् विष्णोःपूजांचयेकुर्युर्जीवन्मुक्तास्तुतेनराः १४ इत्थंदिनत्रयमपिकार्तिकेयेप्रकुर्वते दे
वानामपितेवंद्याःकिंचैवाजन्मतःकृतम् १५ इत्थंगुणवतीसम्यक्प्रत्यब्दंव्रतिनीह्यभूत् नित्यंविष्णोःप्रपूजायां भक्त्या
तत्परमानसा १६ कदाचित्सारुजासाथकृशांगीज्वरपीडिता स्नातुंगंगांगताकांतेकथंचिच्छनकैस्तदा १७ यावज्ज-
लांतरगताकंपिताशीतपीडिता तावत्साविह्वलापश्यद्विमानंयातमंबरात् १८ शंखचक्रगदापद्मैरायुधैरुपलक्षिताः
विष्णुरूपधराःसम्यग्वैनतेयध्वजांकितम् १९ आरोहयंन्विमानंतामप्सरोगणसेवितम् चामरैर्वीज्यमानांतांवैकुंठं म
द्गणानयन् २० अथसातद्विमानस्थाज्वलदग्निशिखोपमा कार्तिकव्रतपुण्येनमत्सान्निध्यंगताभवत् २१ अथब्र
ह्मादिदेवानांयदाप्रार्थनयाभुवम् आगतोहंगणाःसर्वेयातास्तेपिमयासह २२ एतेहियादवाःसर्वे मद्गणाएवभामिनि पि
तातेदेवशर्माभूत्सत्राजितभिधोह्यथ २३ यश्चंद्रनामासौअक्रूरस्त्वंसागुणवतीशुभा कार्तिकव्रतपुण्येन बहुमत्प्रीतिदायि
नी २४ मद्द्वारियत्त्वयापूर्वंतुलसीवाटिकाकृता तस्मादयंकल्पवृक्षस्तवांगणगतःशुभे २५ कार्तिकेदीपदानंचत्व
यायत्तुकृतंपुनः त्वद्देहसंस्थाचशुभातस्माल्लक्ष्मीःस्थिराभवत् २६ यच्चव्रतादिकंसर्वंविष्णवेभर्तृरूपिणे निवेदित
वतीतस्मान्ममभार्यात्वमागता २७ आजन्ममरणात्पूर्वंयत्कृतंकार्तिकव्रतम् कदाचिदपितेनत्वंमद्वियोगंनयास्यसि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ एवंयेकार्तिके मासिनराव्रतपरायणाः मत्सानिध्यंगतास्तेपि प्रीतिदास्त्वंयथामम २९ यज्ञदानव्रततपःकारिणो मा
नवाःखलु कार्तिकव्रतपुण्यस्य नाप्नुवंतिकलामपि ३० इत्थंनिशम्य भुवनाधिपतेस्तदानीं प्राग्जन्मपुण्यभववैभवजात
हर्षी विश्वेश्वरंत्रिभुवनैकनिदानभूतं कृष्णंप्रणम्यवचनंनिजगादसत्या ३१ इतिश्रीपद्मपुराणे कार्तिकमहात्म्ये श्रीकृष्ण
सत्यासंवादे द्वितीयोऽध्यायः २ ६७ सत्योवाच सर्वेपिकालावयवास्तवकालस्वरूपिणाः मासानांतु कथंनाथ स-
मासः कार्तिकोवरः १ एकादशीतिथीनांच मासानांकार्तिकः प्रियः कथंतेदेवदेवेशकारणंतत्र कथ्यताम् २ श्री
कृष्णउवाच साधुपृष्टंत्वयाकांतेशृणुष्वैकाग्रमानसा पृथोर्वैन्यस्यसंवादंमहर्षेर्नारदस्यच ३ एवमेवपुरापृष्टोना
रदःपृथुनाप्रिये उवाच कार्तिकाधिक्यकारणंसर्वविन्मुनिः ४ नारदउवाच शंखनामाभवत्पूर्वमसुरःसागरात्म
जः त्रिलोकीमथनेसक्तोमहाबलपराक्रमः ५ जित्वादेवान्निराकृत्यस्वलोकात्समहासुरः इंद्रादिलोकपालानाम-
धिकारांस्तथाहरत् ६ तद्भयाद्यतेदेवाःसुवर्णाद्रिगुहांगताः न्यवसन्बहुवर्षाणि साबरोधाः सबांधवाः ७ सुव
र्णाद्रिगुहादुर्गसंस्थितास्त्रिदशादयः तद्धीक्षायांबभूवुस्तेतदादैत्योव्यचारयत् ८ हृताधिकारास्त्रिदशामयाय
द्यपिनिर्जिताः लक्ष्यंतेबलयुक्तास्तेकरणीयंमयात्रकिम् ९ ज्ञातंतत्तुमयादेवावेदमंत्रबलान्विताः तान्हरिष्येततःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वैबलहीनाभवंतिवै १० इतिमत्वातदा दैत्योविष्णुमालक्ष्यनिद्रितम् सत्यलोकाज्जहाराशुवेदानादिस्वयंभुवः ११
नीतास्कृतेनतेवेदास्तद्भयात्तेनिराक्रमन् तोयानिविविशुर्यज्ञमंत्रबीजसमन्विताः १२ तान्मार्गमाणःशंखोपिसमुद्रां
तर्गतोभ्रमन् नददर्शतदादैत्यः क्वचिदेकत्रसंस्थितान् १३ अथब्रह्मासुरैःसार्धंविष्णुंशरणमन्वगात् पूजोपकरणान्
गृह्यवैकुंठभुवनंगतः १४ तत्रतस्यप्रबोधायगीतवाद्यादिकाःक्रियाःचक्रुर्देवास्तथागंधधूपदीपान्मुहुर्मुहुः १५ अथप्र
बुद्धोभगवांस्तद्भक्तिपरितोषितः ददृशुस्तेसुरास्तत्रसहस्रार्कसमद्युतिम् १६ उपचारैःषोडशभिः संपूज्यत्रिदशास्तदादंड
वत्पतितामूमौतानुवाचाथमाधवः १७ विष्णुरुवाच वरदोहंसुरगणाःगीतवाद्यादिमंगलैः मनोभिलषितान्कामा
न्सर्वानेवददामिवः १८ इषस्यशुक्लैकादश्यांयावदुत्थोधिनीभवेत् निशातुर्यांशशेषेये गीततुर्यादिमंगलान् १९
कुर्वंतिनित्यंमनुजाभवद्भिर्यद्यथाकृतम् तेमत्प्रीतिकरानित्यंमत्सांनिध्यंव्रजंतिहि २० पाद्यार्घ्याचमनीयापोयद्भ
वद्भिर्यथाकृतम् तदद्भुतगुणंतस्माज्ज्ञानंवोस्करवकारणम् २१ वेदाःशंखाहृताःसर्वेतिष्ठंत्युदकसंस्थिताः तानान
याम्यहंदेवाहत्वासागरनंदनम् २२ अद्यप्रभृतिवेदास्तुमंत्रबीजमखान्विताः प्रत्यब्दंकार्तिकेमासिविश्रमंत्यप्स्
सर्वदा २३ अद्यप्रभृत्यहमपिभवाम्भिजलमध्यगः भवंतोपिमयासार्द्धमायांतुससुनीश्वराः २४ कालेस्मिन्येप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वंति प्रातः स्नानं नरोत्तमाः तेसर्वे यज्ञावभृथैः स्नातास्युर्नसंशयः २५ येकार्तिकव्रतं सम्यक्कुर्वंति मनुजाः
सदा ते देहांते त्वयाशंक प्राप्यमद्भुवनंतदा २६ विघ्नेभ्यो रक्षणं तेषां सम्यक्कार्यं तथा त्वया देयात्वयाच्च वरुणपुत्र
पौत्रादिसंततिः २७ धनवृद्धिर्धनाध्यक्षस्त्वया कार्या ममाज्ञया ममरूपधरः साक्षाज्जीवन्मुक्तोभवेद्यतः २८ आ
जन्ममरणाद्येन कृतमेतद्व्रतोत्तमम् यथोक्तविधिना सम्यक् सामान्योभवतामपि २९ एकादश्यां यतस्त्वाहं भव
द्भिः प्रतिबोधितः अतस्त्वेषा तिथिर्मान्या सातीवप्रीतिदा मम ३० व्रतद्वयं सम्यगिदं नरैः कृतं सांनिध्यकृद्येन तथान्य
दस्ति दानानि तीर्थानि व्रतानि यज्ञाः स्वर्लोकदान्येव तथा सुरोत्तमाः ३१ इति श्रीपद्मपुराणे कार्तिकमहात्म्ये श्रीकृ
ष्णसत्यासंवादे तृतीयोऽध्यायः ३ नारद उवाच इत्युक्त्वा भगवान्विष्णुः शफरीतुल्यरूपधृक् ययौ तदांजलौ
विंध्यवासिनः कश्यपस्य सः १ सतं कमंडलौ क्षिप्तं कृपया क्षिप्तवान्मुनिः तावत्सनममौ तत्र ततः कूपेन्यवेशयत् २
तत्रापि न ममौ तावत्कासारं प्रापयत्सतम् एवं स सागरे क्षिप्तस्तत्र सापि व्यवर्धत ३ ततो वधीत्सतं शंखं विष्णुर्म
त्स्यस्वरूपधृक् अथ तं स्वकरे धृत्वा बदरीवनमागमत् ४ तत्राहूय ऋषीन्सर्वानिदमाज्ञापयत्प्रभुः विष्णुरुवाच
जलांतरविशीर्णास्ते यूयं वेदान्समाहरथ ५ आनयध्वं च त्वरिताः सरहस्याञ्जलांतरात् तावत्प्रयागे तिष्ठामि देवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ॰ मा॰ गणसंयुतः ६ नारदउवाच ततस्तैः सर्वमुनिभिस्तपोबलसमन्वितैः उद्धृतास्त्वसबीजास्ते वेदायज्ञसमन्विताः ७ ते अ॰
४ षुयावन्मितंयेनलब्धंतावद्धितस्यतत्ससएवऋषिर्जातस्त तत्प्रभृतिपार्थिव ८ अथसर्वेपिसंगम्यप्रयागंमुनयोय ५
युः विष्णवेसविधात्रेते लब्ध्वावेदान्यवेदयत् ९ लब्ध्वावेदान्समग्रांस्तुब्रह्माहर्षसमन्वितः अयजद्वाजिमेधेनदेव
र्षिगणसंयुतः १० यज्ञांतेदेवगंधर्वयक्षपन्नगगुह्यकाः निपत्यदंडवद्भूमौविज्ञप्तिंचक्रुरंजसा ११ देवाऊचुःदेवदेव
जगन्नाथविज्ञप्तिंशृणुनःप्रभो हर्षकालोयमस्माकंतस्मात्त्वंवरदोभव १२ स्थानेस्मिन्द्रुहिणोवेदान्नष्टानुप्रापपु
नस्त्वयं यज्ञभागान्वयंप्राप्तास्त्वत्प्रसादाद्रमापते १३ स्थानमेतद्दिनःश्रेष्ठं पृथिव्यांपुण्यवर्धनम् भुक्तिमुक्तिप्रदं
चास्तुप्रसादाद्भवतःसदा १४ कालोप्ययंमहापुण्योब्रह्मप्रादिविशुद्धिकृत् दत्ताक्षरकरंचास्तुवरमेवंददस्वनः १५
विष्णुरुवाच ममाप्येतद्भूतंदेवायद्भवद्भिरुदाहृतम् तथास्तुसुलभत्वेतद्ब्रह्मक्षेत्रमितिप्रथं १६ सूर्यवंशोद्भवोरा
जागंगामत्रानयिष्यति सासूर्यकन्ययाचात्रकालिंद्यायोगमेष्यति १७ सूर्यंचसर्वेब्रह्माद्यानिवसंतुमयासह तीर्थ
राजेतिविख्यातंतीर्थमेतद्भविष्यति १८ दानंतपोव्रतंहोमोजपपूजादिकाःक्रियाः अनंतफलदाःसंतुमत्सान्निध्य ४
कराःसदा १९ ब्रह्महत्यादिपापानिसप्तजन्मार्जितानिच दर्शनादस्यतीर्थस्यविनाशंयांतुतत्क्षणात् २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहत्यागंचयेधीराः कुर्वंतिममसन्निधौ मत्तनुंप्रविशंत्येतेनपुनर्जन्मिनोनराः २१ पितृनुद्दिश्ययेश्राद्धंकुर्वंत्य
त्रममाग्रतः तेषांपितृगणाःसर्वेयांतितेमत्सरूपताम् २२ कालोप्येषमहापुण्यफलदोस्तुसदान्नृणां सूर्येमकर
गेमासेस्नायीनांपापनाशनः २३ मकरस्थेरवौमाघेप्रातःस्नानंप्रकुर्वताम् दर्शनादेवपापानियांतिसूर्योद्ययात्त
मः २४ सलोकत्वंसमीपत्वंसारूप्यंन्वत्रयंक्रमात् नृणांदास्यामय्हंस्नानैर्माघेमकरगेरवौ २५ यूयंमुनीश्वराः
सर्वेश्शृणुध्वंवचनंमम बदरीवनमध्येहंसदातिष्ठाभिसर्वगः २६ अन्यत्रदशभिर्वर्षैस्तपसाप्राप्यतेफलम् तत्र
तद्दिवसैकेनभवद्भिःप्राप्यतेसदा २७ स्थानस्यदर्शनंतस्ययेकुर्वंतिनरोत्तमाःजीवन्मुक्ताःसदातेषुपापंनैवाव
तिष्ठति २८ नारदउवाच एवंदेवान्देवदेवस्तदुक्त्वातत्रैवांतर्धानमागात्सवेधाः देवाःसर्वेप्यंशकैस्तत्रतिष्ठंश्चांत
र्धानंप्रापुरिंद्रादयस्ते २९ इमांकथांयःशृणुयान्नरोत्तमोयःश्रावयेद्वापिविमुक्तचेतसा सतीर्थराजंबदरीवनंयद्
त्वाफलंपत्समवाप्नुयाच्च ३० इतिश्रीपद्मपुराणेकार्तिकमहात्म्येश्रीकृष्णासत्यासंवादेप्रयागवर्णनंनामचतुर्थो
ध्यायः ४ ॥ पृथुरुवाच महत्फलंत्वयाप्रोक्तंमुनेकार्तिकमाघयोः तयोःस्नानविधिंसम्यङ्गियामानपि
नारद १ उद्यापनविधिंचैवयथावद्वक्तुमर्हसि नारदउवाच त्वंविष्णोरंशसंभूतोनाज्ञातंविद्यतेतव २ तथापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदतःसंम्यंङ्क्रियमानपिवैश्शृणु अश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत् ३ कार्तीकस्यव्रतानीहतस्यांकुर्या
दतंद्वितः रात्र्यांतुर्यांशाशेषायासुदतिष्ठेत्सदाव्रती ४ प्रागुदीचीव्रजेद्ग्रामाद्बहिःसोदकभाजनः दिवासंध्यासुकर्ण
स्थब्रह्मसूत्रउदङ्मुखः ५ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा वक्त्रंनियम्ययत्नेनष्ठीवनोच्छ्वासवर्जितः
६ कुर्यान्मूत्रपुरीषेच्च रात्रौवैदक्षिणामुखः गृहीतशिश्नश्चोत्थायमृद्भिरभ्युक्षितैर्जलैः ७ गंधलेपक्षयकरंशौचंकु
र्यादतंद्वितःएकालिंगेकरेतिस्त्रउभयोर्मृद्द्वयंस्मृतम् ८ पंचापानेदशैकस्मिन्नुभयोःसप्तमृत्तिका एतच्छौचंगृह
स्थस्यद्विगुणंब्रह्मचारिणः ९ वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणम् यद्दिवाविहितंशौचंतदर्धंनिशिकीर्तितम्
१० तदर्धमातुरेप्रोक्तमातुरस्यार्धमध्वनि शौचकर्मविहीनस्यसकलानिष्फलाःक्रियाः ११ मुखशुद्धिविहीनस्य
नमंत्राःफलदायकाःदंतजिह्वाविशुद्धिंचततःकुर्यात्प्रयत्नतः १२ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच ब्र
ह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते १३ इतिमंत्रंसमुच्चार्यद्वादशांगुलयागृही समिधाक्षीरवृक्षस्यक्षया
होपोषणंविना १४ प्रतिपद्दर्शनवमीषष्ठीचार्कदिनेतथा चंद्रसूर्योपरागेचनकुर्याद्दंतधावनम् १५ कंटकी
वृक्षकार्पासीनिर्गुंडीब्रह्मवृक्षकाः वटैरंडविगंधाद्यान्वर्जयेद्दंतधावने १६ ततोविष्णोःशिवस्यापिगृहंगच्छे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मसन्नधीः पुष्पगंधान्सतांबूलान् गृहीत्वाभक्तितत्परः १७ तत्रदेवस्यपाद्यादीनुपचारान् पृथक् पृथक् कृत्वास्तु
त्वापुनर्गत्वाकुर्याद्गीतादिमंगलम् १८ तालवेणुमृदंगादिध्वनियुक्तान्सनर्तकान् पुष्पैर्गंधैःसतांबूलैर्गायकानपिचार्चये
त् १९ देवालयेगीतपरोयतस्तेविष्णुमूर्तयः तपांसियज्ञदानानिकृतादिषुजगद्गुरोः २० तुष्टिदानिकलौयस्माद्भक्त्यागानं
प्रशस्यते कृत्वंवससिदेवेशामयापृष्टस्तुपार्थिव २१ विष्णुरेवंतदाप्राहमद्भक्तिपरितोषितः नाहंवसामिवैकुंठेयोगिनां
हृदयेरवौ २२ मद्भक्तायत्रगायंतितत्रतिष्ठामिनारद तेषांपूजादिकंगंधपुष्पादिक्रियतेनरैः २३ तेनप्रीतिंपरांयामितथा
मत्प्रपूजनात् मत्पुराणकथांश्रुत्वामद्भक्तानांचगायनं २४ निंदंतियेनरामूढास्तेमद्द्वेष्याभवंतिहि शिरीषोन्मत्तगिरिजा
मल्लिकाशाल्मलीभवैः २५ अर्कजैः कर्णिकारैश्चविष्णुर्नार्च्यस्तथाक्षतैः जपाकुंदशिरीषैश्चयूथिकामालतीभवैः २६ केत
कीभवपुष्पैश्चनैवार्च्यःशंकरस्तथा गणेशंतुलसीपत्रैर्दुर्गांनैवतुदूर्वया २७ मुनिपुष्पैस्तथासूर्यंलक्ष्मीकामोनचार्चयेत्
एभ्योन्यानिप्रशस्तानिपूजायांसर्वदैवतु २८ एवंपूजाविधिंकृत्वादेवदेवंक्षमापयेत् मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्व
र २९ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ततःप्रदक्षिणांकृत्वादंडवत्प्रणिपत्यच ३० पुनःक्षमाप्यदेवेशंगायन्नाद्यंसमाप
येत् ३१ विष्णोःशिवस्यापिचपूजनंयेकुर्वंतिसम्यङ्गिशिकार्तिकस्य विधूतपापाःसहपूर्वजैस्तेप्रयांतिविष्णोर्भवनंमनु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्याः ३२ इतिश्रीकार्तिकमहात्म्येश्रीकृष्णासत्यासंवादे कार्तिकव्रतकथनंनामपंचमोध्यायः ५ नारदउवाच नाडिहूया
वसिष्ठायांराव्यांगच्छेज्जलाशये तिलदर्भाक्षतैःपुष्पगंधाद्यैः सहितः शुचिः १ मानुषेदेवखातेचनद्यामथचसंगमे क्रमाद्द
शगुणंस्नानंतीर्थेतद्द्विगुणंस्मृतम् २ विष्णुःस्मृत्वाततःकुर्यात्संकल्पंसवनस्यच तीर्थादिदेवताभ्यश्चक्रमादर्घ्यादिदापयेत्
३ अर्घ्यमंत्रः नमःकमलनाभायनमस्तेजलशायिने नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते ४ वैकुंठेचप्रयागेचतथाब
दरिकाश्रमे यतोविष्णुर्विचक्रमेत्रेधानिदधेपदं ५ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे तैरेवसहितःसम्यङ्मुनिवेद
मरवान्वितैः ६ कार्तिकेहंकरिष्यामिप्रातःस्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह ७ ध्यात्वानत्वाचदेवेशंजले-
स्मिन्स्नातुमुद्यतः तवप्रसादात्पापंमेदामोदरविनश्यतु ८ अर्घ्यमंत्राः नित्येनैमित्तिकेकृष्णाकार्तिकेपापनाशने गृहाणा
र्घ्यंमयादत्तंदानवेंद्रनिषूदन ९ स्मृत्वाभागीरथींविष्णुंशिवंसूर्यंजलेविशेत् नाभिमात्रेततस्तिष्ठेद्व्रतीस्नायाद्यथाविधि १०
तिलामलकचूर्णेनगृहीस्नानंसमाचरेत् विधवास्त्रीयतीनांतुतुलसीमूलमृत्स्नया ११ सप्तमीदर्शनवमीद्वितीयादशमीषु
च त्रयोदश्यांनवैस्नायाद्धात्रीफलतिलैःसह १२ आदौकुर्यान्मलस्नानंमंत्रस्नानंततःपरं स्त्रीशूद्राणांनवेदोक्तैर्मंत्रैस्ते-
षांपुराणजैः १३ स्नानमंत्रः त्रिधाभूद्देवकार्यार्थंयःपुराभक्तभावना सविष्णुःसर्वपापघ्नःपुनातुकृपयात्रमाम् १४ वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्योराज्ञामनुप्राप्य कार्तिकव्रतकारकान् रक्षंति देवास्तेसर्वे मांपुनंतुसवासवाः १५ वेदमंत्राःसबीजाश्चसरहस्यामखा
न्विताः कश्यपाद्याश्चमुनयोमांपुनंतुसवासवाः १६ गंगाद्याःसरितः सर्वास्तीर्थानिजलदानदाः ससप्तसागराःसर्वेमांपु
नंतुजलाशयाः १७ पतिव्रतास्त्वदित्याद्यायक्षाःसिद्धाः सपन्नगाः औषध्यःपर्वताश्चापिमांपुनंतु त्रिलोकजाः १८ ए
भिःस्नात्वाव्रतीमंत्रैर्हस्तन्यस्त पवित्रकः देवर्षिमानवान्पितॄंस्तर्पयेच्चयथाविधि १९ यावंतःकार्तिकेमासिवर्ततेपितृ
तर्पणे तिलास्तत्संख्यकाब्दानिपितरःस्वर्गवासिनः २० ततोजलाद्विनिष्क्रम्यशुचिवस्त्राहृतोव्रती प्रातःकालोदि
तंकर्मसमाप्यार्च्योहरिःपुनः २१ तीर्थादिदेवान्संस्मृत्यपुनरर्घ्यंप्रदापयेत् गंधपुष्पफलैर्युक्तोभक्त्यातत्परमानसः
२२ अर्घ्यमंत्राः व्रतिनः कार्तिकेमासिस्नातस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंराधयासहितोहरे २३ ततश्चब्राह्म
णान् भक्त्यापूजयेद्वेदपारगान् गंधैःपुष्पैःसतांबूलैःप्रणमेच्चपुनःपुनः २४ तीर्थानिदक्षिणेपादेवेदास्तन्मुखमाश्रिताः
सर्वांगेष्वाश्रितादेवाःपूजितास्तेतदर्चया २५ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि नावमान्यानोविरोध्याःकदा
चिच्छुभमिच्छता २६ ततोहरिप्रियांदेवींतुलसीमर्चयेद्व्रती प्रदक्षिणानमस्कारान्कुर्यादेकाग्रमानसः २७ देवैस्त्वंनि
र्मितापूर्वमर्चितासिमुनीश्वरैः नमोनमस्तेतुलसिपापंहरहरिप्रिये २८ ततोविष्णुकथांश्रुत्वापौराणींस्थिरमानसः पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्तान्ब्राह्मणांश्चैवपूजयेद्भक्तिमान्व्रती २९ एवंसर्वविधिंसम्यक्पूर्वोक्तंभक्तिमान्नरः करोतियः सलभतेनारायणसलोक
ताम् ३० रोगापहंपातकनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसाधकं मुक्तेर्निदानंनहिकार्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिशो-
भनं ३१ इतिश्रीप॰ कार्ति॰ श्रीकृष्णा॰ षष्ठोध्यायः ६ नारदउवाच कार्तिकव्रतिनांपुंसांनियमायेप्रकीर्तिताः तान्शृणुष्व
महाराजकथ्यमानान्समासतः १ सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा राजिकोन्मादिकंचापिनैवाद्यात्कार्तिकव्रती २
परान्नंचपरद्रोहंपरदेशागमंतथा तीर्थंविनासदैवेहवर्जयेत्कार्तिकव्रती ३ देववेदद्विजातीनांगुरुगोव्रतिनांतथा स्त्री
राजमहतांन्निदांवर्जयेत्कार्तिकव्रती ४ प्राण्यंगमामिषंचूर्णंफलंजंबीरमामिषं धान्येमसूरिकाप्रोक्ताअन्नंपर्युषितंतत
था ५ अजागोमहिषीक्षीरादन्यदुग्धादिचामिषं द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ६ ताम्रस्थितंपंचगव्यंजलंप
ल्वलसंस्थितं आत्मार्थपाचितंचान्नमामिषंचोच्यतेबुधैः ७ ब्रह्मचर्यमधःशय्यापत्रावल्यांचभोजनम् चतुर्थकालेभ्कं
जानः कुर्यादेवंसदाव्रतम् ८ नरकस्यचतुर्दश्यांतैलाभ्यंगंचकारयेत् अन्यत्रकार्तिकेमासितैलस्नानंविवर्जयेत् ९
पलांडुंवृंतकंशृंगंछत्राकंगृंजरंतथा नालिकांमूलकंचैववर्जयेत्कार्तिकव्रती १० अलांबुचापिवृंताकंकूष्मांडंबृहतिंद्व
यम् श्लेष्मातकंकपित्थंचवर्जयेद्वैष्णवव्रती ११ एभिर्दृष्टंश्वकाकैश्चसूतकान्नंचयद्भवेत् द्विःपाचितंचदग्धान्नंनैवाद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास-वैद्यक-मंत्र-स्तोत्र-कोश-काव्य-चम्पू-नाटकालंकार-संगीत-नीति-कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः संस्कृतभाषया, हिन्दीमारवाडचन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानिच; मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय । येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि मुमुद्रयिषुभिः सुलभयोग्यमौल्येन सीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारातैः प्रेषणीयोऽस्मि ।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम् ।

क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः खेतवाडी-मुंबई.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥*॥ इति मलमासमाहात्म्यं समाप्तम् ॥*॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ श्रीगणपतये नमः ॥ पिंचिंडिल्लस्यदेवस्य चरणांभोरुहंनुमः ॥ विलेखनविधौनिर्विघ्नतासिद्ध्यर्थमेवहि ॥१॥ शास्त्रपूर्वकप्र-
योगस्याऽभ्युदयसाधनत्वमभ्यधायि । शास्त्रपूर्वकप्रयोगइति । एकः शब्दः सम्यक् ज्ञातइतिच । नचस्वादीनामपरिज्ञाया
ऽर्थविशेषंतदंतंशब्दानर्थेषुप्रयोक्तुमीश्महे । अर्थविशेषंप्रतीत्यकहेशाप्रयुक्तोहिशब्दप्रयोगः । अतस्तेषामर्थविशेषाभिधित्स-
यांइदंप्रकरणमारभ्यते ॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रेप्रथमा ॥ ननुस्वार्थद्रव्यलिंगसंख्याकारकाणांपंचानांप्रा-
तिपदिकार्थत्वाल्लिंगग्रहणमनर्थकंअतआहनियतेति । नियमोव्याप्तिः निरूपकत्वेनत—तीव्यापिकेत्यर्थः । प्रकरणाच्च
प्रातिपदिकनियतेतिलभ्यते । नित्यप्रातिपदिकव्यापकत्वंवानित्योपस्थितेर्नसंभवतिइतिप्रातिपदिकोपस्थितिव्याप-
कत्वंविवक्षितंतच्चयदायत्प्रातिपदिकोपस्थितिस्तदायदर्थोपस्थितिरितिकालघटितंग्राह्यं । तथाचतत्प्रातिपदिकनिरू-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिततदर्थसंबंधग्रहसमुत्थोद्बुद्धसंस्कारसध्रीचीनतत्प्रातिपदिकोपस्थितिनिष्ठकालिकसंबंधावच्छिन्नव्याप्यतानिरूपितका-
लिकसंबंधावच्छिन्नव्याप्यतानिरूपितकालिकव्यापकताश्रयोपस्थितिविषयस्तत्प्रातिपदिकार्थइतिनिष्कर्षः। एतेन
प्रातिपदिकार्थोपस्थितेरगृहीतसंगतिकप्रातिपदिकोपस्थित्यव्यापकत्वेपिनक्षतिः नचभगवदुपस्थितेर्द्वैपायनादिविष-
यकसंगतिग्रहजनितसंस्कारसचिवकृष्णप्रातिपदिकोपस्थित्यव्यापकत्वेपिचभगवतः कृष्णप्रातिपदिकार्थत्वक्षतिः।
तत्प्रातिपदिकजन्यत्वेनचव्यापकोपस्थितिर्विशेषणीयानातः कृष्णप्रातिपदिकोपस्थितिव्यापकभगवन्निष्ठनित्योपस्थि-
तिविषयगगनादेः कृष्णप्रातिपदिकार्थत्वापत्तिः। अत्रचक्रमिकयोप्रातिपदिकतदर्थोपस्थित्योरेकक्षणांतर्भावेनयदा
प्रातिपदिकोपस्थितिस्तदार्थोपस्थितिरितिसमानाधिकरण्यासंभवाद्द्वित्रादिक्षणावच्छेदेनव्याप्तिर्ग्राह्याकालिकसंबंधनि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ वेशाच्च यत्रदेवदत्तादौतटादिप्रातिपदिकोपस्थितिस्तत्रपुंस्त्वाद्युपस्थितिरिरितिदैशिकव्याप्तिसत्वेपिनपुंस्त्वादेर्नियतोपस्थिति
कत्वापत्तिः। ननुकृष्णप्रातिपदिकस्यभवावदाद्यनेकार्थत्वेपियथासर्वेषांनियतोपस्थितिकत्वंएवंतटशब्दस्यानेकलिंगत्वे-
पिसर्वेषांनियतोपस्थितिकत्वंकिन्नभविष्यतिः नचतत्तत्प्रत्ययसमभिव्याहारेतत्तल्लिंगस्यैवबोधकतयानकिमपिलिंगं
ततोनियतोपस्थितिकमितिवाच्यं। पराशरसूनुः कृष्णइत्यादिसमभिव्याहारेद्वैपायनस्यैवोपस्थित्याभगवतोपिकृष्णप्राति-
पदिकनियतोपस्थितिकत्वानापत्तेः। नचतत्रभगवतोप्युपस्थितिरस्त्येवशाब्दबोधाविषयत्वंतुआरोग्यतानिश्चयेनप्रतिबंधा
दितिवाच्यं। प्रकृतेप्युपस्थितस्यैवपुंस्त्वस्यलिंगांतरावरुद्धेन्वयायोग्यत्वनिश्चयादेवशाब्दबोधाविषयत्वोपपत्तेः। नचतुल्य
वदुपस्थितयोर्लिंगयोरेकतरेणप्रथममवरोधःपश्चादितरस्यान्वयायोग्यत्वमित्यत्रविनिगमनाविरहइतिवाच्यं। द्योतक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभक्तिसमवधानस्यैव विनिगमकत्वात् । नचद्योतकसमवधानमुपस्थितेरेव नियामकं न शाब्दबोधस्येति वाच्यम् । पदां-
तरसमभिव्याहारस्यापि ताद्दशत्वसंभवेन भगवतोव्यनियतोपस्थितिकत्वापत्तेः । नचांतरेणापि पदांतरसमभिव्याहारमर्थो
पस्थितिदर्शनान्नतस्योतत्रोपयोग इति वाच्यम् । तटभुवियमुनायाइत्यादावंतरेणापि द्योतकसमवधानं लिंगोपस्थितिदर्श-
नेन तस्य तत्राकिंचित्करत्वात् । नच तटादिशब्दानामकारांतानां पुंस्त्वादिबोधकताबोधकतावच्छेदकानुपूर्व्यास्तुल्यत्वेन त-
टं तटानित्यादावपि शाब्दबोधापत्तेः किंतु विसर्गाद्यंतानामेव तथाच तत्र लिंगस्य पाक्षिकोपस्थितिकत्वमेव नास्ति कुतो नि-
यतोपस्थितिकत्वप्रसक्तिरिति वाच्यम् । तथासति तटमित्यादौ लिंगस्य प्रातिपदिकजन्योपस्थितिविषयत्वादेव लिं-
गग्रहणस्य सप्रयोजनत्वे नियतोपस्थितिकत्वापर्यंतानुधावनवैयर्थ्यापत्तेः विसर्गौकारनकारांततटशब्दजनिततटग-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ तपुंस्त्वाद्युपस्थितिषुपरस्परव्यभिचारवारणायस्वाव्यवहितोत्तरताद्दशापुंस्त्वाद्युपस्थितित्वावच्छिन्नं प्रतिविसर्गाद्यं-
ततटाद्युपस्थितित्वेनगुरुतरानेककार्यकारणभावापत्तेः विशेषसामग्रीसहितायाएवसामान्यसामग्र्याः प्रतिबंधका
भावविशिष्टायाश्चफलाधायकतयाविसर्गादिसमवधानस्यपुंस्त्वादिबोधंप्रति विशेषसामग्रीत्वकल्पनेनवाअमादिस-
मवधानस्यवाप्रतिबंधकत्वकल्पनेन तटमित्यादौपुंस्त्वादिबोधानापत्तेः । अनादितटंतटानित्यादौप्रातिपदिकस्याक्ली-
बत्वेक्लिबात्परत्वनिबंधनयोर्लुगमादेशयोः क्लीबत्वनिबंधनस्यचनुमोप्रवृत्तिप्रसंगात् । तटा।नीत्यादौचशिभावइत्यन्यो
न्याश्रयात् । शास्त्रस्यसिद्धशब्दस्वरूपान्व्याख्यानपरत्वेनोत्पत्तौतदभावेज्ञप्तौनद्धौव्यात् । प्रतीरंचतटंत्रिष्वितिप्राति-
पदिकमात्रस्यत्रिलिंगताबोधकानुशासनविरोधात् । तृतीयादिषुभाषितपुंस्कमित्यादौप्रातिपदिकस्यैवलिंगबोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तायाअवश्याश्रयणीयत्वात् अन्वयानादयेइत्यादेरेव पुंस्त्ववाचकत्वेनतस्या निगतत्वादक्लीबत्वाच्चसंगत्यापत्तेः अर्द्धर्चाः
पुंसिचेतिप्रातिपदिक मात्रस्यलिंगद्वयबोधकत्वानुशासनात् । नचस्वमोर्नपुंसकादित्यादिषुसर्वत्रनपुंसकबोधक
समुदायघटकत्वमेवनपुंसकत्वंप्रातिपदिकस्येतिनदोषइतिवाच्यम् । श्रीपामित्यादिषुश्रीशब्दस्यनपुंसकह्रस्वत्वाप-
त्तेः । नचस्वघटितसमुदायबोध्यनपुंसकत्वाश्रयबोधकसमुदायघटकत्वमेवनपुंसकत्वंश्रीपमित्यादौचनश्रीशब्दार्थ-
स्यनपुंसकत्वाश्रयत्वमितिवाच्यम् । श्रीप्रमेयमित्यादौतस्यापिसुलभत्वात् । नच तादृशनपुंसकत्वान्वयितावच्छेदक
प्रवृत्तिनिमित्तंतत् श्रीप्रमेयमित्यादौचश्रीरूपप्रमेयत्वमेव तदन्वयितावच्छेदकं नश्रीत्वमितिनश्रीशब्दस्यनपुंसकह्रस्व
त्वापत्तिरितिवाच्यम् । देवतापूजनोद्युक्तदैवतानीत्यादौनपुंसकत्वान्वयितावच्छेदकहेवतत्वाभिन्नदेवतात्वप्रवृत्तिनि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ त्यादौ मित्तकदेवताशब्दस्यापि नपुंसकह्रस्वत्वापत्तेः नहि दैवतदेवतात्वयोर्घटत्वकलशत्वयोस्तुल्यव्यक्तिकयोर्नी-
लत्वोत्पलत्वयोर्भेदोस्ति तथा च दैवतदेवतयोर्भिन्नप्रवृत्तिनिमित्तकत्वेन नीलोत्पलवदेव सप्रयोगापत्तेः। सर्वेष्वप्येतेषु
पक्षेषु पूर्वोक्तशब्दान्योन्याश्रयतादवस्थ्यात् लोकप्रसिद्धनपुंसकवाचकाविलक्षणनपुंसकत्वनिर्वचनस्य लिंगमशि-
ष्यं लोकाश्रयत्वाल्लिंगस्येत्यादिवार्त्तिकादिविरुद्धत्वात्सर्वत्र लिंगस्य प्रातिपदिकबोध्यत्वोपपत्तौ क्वचित्समुदायबो-
ध्यत्वेन वैरूप्यानुपपत्तेः। अनादिनेतटायेत्यादौ वाचकतावच्छेदकतानुपूर्व्यास्तुल्यत्वेन तत्पक्षेपि पुंस्त्वादिबोधापत्तेर्दु-
र्वारत्वात्समभिव्याहारविशेषानुपस्थितिः शाब्दबोधाविषयत्वं वेति कल्पनस्य परस्यापि समानत्वात् तस्माल्लाघवाद-
वैरूप्यानिर्दुष्टत्वाच्चानियतलिंगस्थलेपि लिंगस्य प्रातिपादिकबोध्यत्वाद्विशेषसामग्रीप्रतिबंधकाभावादिघटितत-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तत्प्रातिपदिकोपस्थितिव्यापकोपस्थितिकत्वाच्च कथं तटादिप्रातिपदिकार्थत्वाभावइतिचेदत्राभिधीयते। तत्प्रातिपदिक
जन्योपस्थितिनिष्ठतत्प्रवृत्तिनिमित्तविषयिताव्यापकविषयित्वकत्वं तत्प्रवृत्तिनिमित्तकतत्प्रातिपदिकनियतोप-
स्थितिकत्वंकृष्णइभवतिचेदं नियतोपस्थितिकत्वं कृष्णइत्यादौ पुंस्त्वस्य कृष्णप्रातिपदिकजन्योपस्थितिनिष्ठाया ना-
रायणत्वैकार्थसमवेतकृष्णत्वविषयितायाः पुंस्त्वविषयिताव्याप्यत्वात्। तटमित्यादौ च तटप्रातिपदिकजन्योपस्थिति
निष्ठतटत्वविषयितासमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकस्वविषयित्वकत्वात् पुंस्त्वादेर्न नियतोपस्थि-
तिकत्वप्रसक्तिः दैवतप्रातिकजन्योपस्थितिनिष्ठदैवतत्वविषयितायादेवतात्वविषयिताभिन्नतयातदव्यापकत्वात्स्त्री-
त्वविषयितायाः स्त्रीत्वस्यानियतोपस्थितिकत्ववारणाय तत्प्रातिपदिकजन्योपस्थितिनिष्ठेति तत्प्रवृत्तिनिमित्तविषयिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ यत्विशेषणं निरूपकाभेदेव्याश्रयभेन विषयिताभेदात् देवताप्रातिपदिकजन्योपस्थितिनिष्ठदेवतात्वविषयिताव्या-
पकत्वमेवस्त्रीत्वविषयितायाः। यदि चाश्रयभेदेन निरूपकाभेदमात्रेणाविषयितैक्यं तदा तत्प्रातिपदिकजन्योपस्थिति
वृत्तित्वविशिष्टतत्प्रवृत्तिनिमित्तविषयिताव्यापकत्वं बोध्यं। कृष्णप्रातिपदिकजन्योपस्थितिनिष्ठपांचालीत्वसमाना-
धिकरणप्रवृत्तिनिमित्तविषयित्वाव्यापकत्वात् पुंस्त्वादिविषयितायास्तत्प्रवृत्तिनिमित्तविषयितेति तट प्रातिपदिक
जन्योपस्थितिनिष्ठतटत्वविषयितासामानाधिकरणविषयिताकपुंस्त्वादिवारणाय व्यापकेति अभेपि व्याप्यव्या-
पकभावात् प्रवृत्तिनिमित्तेनाव्याव्याप्तिः। तत्प्रादिकजन्योपस्थितिनिष्ठस्वविषयित्वानातिरिक्तवृत्तितत्प्रवृत्ति
निमित्तविषयिताकत्वं वा तत्प्रवृत्तिनिमित्तकतत्प्रातिपदिकानियतोपस्थितिकत्वं। व्यावृत्तिश्च पूर्ववत्। स्वसामाना-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकरण्यस्वाभावसामानाधिकरण्योभयसंबंधेन स्वविषयितावि शिष्टतत्प्रातिपदिकजन्योपस्थितिनिष्ठतत्प्रवृ-
त्तिनिमित्तविषयिताकान्यत्वं तत्प्रातिपदिक नियतोपस्थितिकत्वंस्वंतटादि प्रातिपदिक बोध्यं पुंस्त्वादि विषयिता
निरुक्तोभयसंबंधेन तद्विशिष्टायातटत्वरूपप्रवृत्तिनिमित्त विषयितातादृशविषयिताकंतटोपस्थाप्यं पुंस्त्वादितदन्य-
त्वंचकृष्णोपस्थाप्यपुंस्त्वइति तस्य नियतोपस्थितिकत्वं स्वरूपतः पुंस्त्वादेरभिन्नत्वेपि तत्तत्प्रातिपदिकोपस्थाप्यत्वे
नभिन्नत्वान्नक्षतिः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरामायनमः। अभेदसंसर्गावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेन घटप्रकारकज्ञानत्व
बुद्धित्वावच्छिन्नं प्रतिधर्मितावच्छेदकतासंबंधेन घटप्रकारकयोग्यताज्ञानं कारणं। न च धर्मितावच्छेदकतासंबंधेन का
र्यकारणभावांगीकारे द्रव्यत्वावच्छिन्नानुपस्थितिदशायां द्रव्यं घट इत्याकारकघटप्रकारकयोग्यताज्ञानाद्धर्मिता
वच्छेदकतासंबंधेन द्रव्यत्वे वर्त्तमानात्तादृशसंबंधेन घटप्रकारकबोधस्य द्रव्यत्वे आपत्तिरिति वाच्यं। द्रव्यत्वाव
च्छिन्नोपस्थितिसहकारेणैव योग्यताज्ञानस्य तादृशबोधजनकत्वात्। न च द्रव्यत्वावच्छिन्नोपस्थितिमंतरेणा
पि घटः प्रमेय इति घटप्रकारकयोग्यताज्ञानेन धर्मितावच्छेदकतासंबंधेन प्रमेयत्वे घटप्रकारकबोधोत्पत्त्या
तादृशोपस्थितेः न सहकारिणीति वाच्यं। प्रकारतासंबंधेन शाब्दबोधं प्रति प्रकारतासंबंधेन पदार्थोपस्थि
तेः कारणत्वांगीकारेण पदार्थोपस्थितेः सहकारिताया वक्तुं शक्यत्वात्। धर्मितावच्छेदकतासंबंधेन प्रमेयत्वादि
निष्ठघटप्रकारक॰कज्ञानत्वबोधं प्रति प्रकारतासंबंधेन तन्निष्ठज्ञानत्वबोधस्य व्यापकत्वात्। न चैवं प्रमेयपदशक्यः वमपि४
समूहालंबने३ प्रमेयः द्रव्यसमानाधिकरणो घट इतिज्ञानात्प्रमेयत्वावच्छिन्नस्य द्रव्यत्वावच्छिन्नस्य च युगपदुपस्थिति
सत्तानंगीतन इदंयद्वे रत्तियोग्यताज्ञानात् द्रव्यत्वे तादृशबोधापत्तिर्दुर्वारैवेति [illegible]· तत्कारणायत्तधर्मावच्छि
न्नविशेष्यकज्ञानत्वबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकोपस्थितेर्हेतुत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यप्रवृत्तिप्रकारतानिरूपितद्रव्यत्वावच्छिन्नविशेष्यताकोपस्थितेन ९

वक्तव्यं· एवंच प्रवृत्तिज्ञानजन्यद्रव्यत्वावच्छिन्नोपस्थितेरभावेन तदानींज्ञानाद्बोधापत्तिः। प्रमेयत्वप्रकारकः
प्रमेयइतिवृत्तिज्ञानेनोपस्थितिकालेद्रव्यत्वावच्छिन्नविशेष्यकबोधानुत्पत्त्यापत्तेः द्रव्यत्वावच्छिन्नविशेष्यक
त्वादिनिवेशः। एवंच समवायसंबंधेन लाघवात्स्वपदार्थोपस्थितेः कारणत्वं युक्तं नतु विषयतासंबंधेन·
पुरुषभेदेन कार्यकारणभावबाहुल्यप्रसंगात्· पदार्थोपस्थितेः समवायसंबंधेन कारणत्वे सहकारित्वा
संभवेन योग्यताज्ञानस्यापि समवायसंबंधेनैव पूर्वोक्तदोषभियाकारणत्वं [redacted] एवंच धर्मितावे कथं·५
छेदकतासंबंधेन योग्यताज्ञानस्य कथं हेतुत्वं वाच्यं· इत्यर्थकोव्युत्पत्तिवादैकदेशः। ननु द्रव्यत्वावच्छिन्नवि
शेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति वृत्तिज्ञानजन्यद्रव्यत्वावच्छिन्नविशेष्यकोपस्थितेः प्रमेयत्वावच्छिन्नविशे ष
ष्यकशाब्दबोधं प्रति वृत्तिज्ञानजन्यप्रमेयत्वावच्छिन्नविशेष्यकोपस्थितेश्च प्रकारतासंबंधेन हेतुत्वोपग
मे द्रव्यत्वाद्येकैकधर्मितावच्छेदकस्थले पुरुषभेदेनानंतकार्यकारणभावप्रसंगः [redacted] समवायसंबंधेन ताद
शोपस्थितेः कारणत्वे द्रव्यत्वाद्येकैकधर्मितावच्छेदकस्थले एक एव कार्यकारणभाव इति महल्लाघवमतो॥
समवायसंबंधेनैव पदार्थोपस्थितेर्हेतुत्वं भट्टाचार्यैः प्रदर्शितं· तत्रायुक्तं· एकधर्मितावच्छेदकस्थले पुरु
षसमसंख्याककार्यकारणभावसत्वेपि पदार्थोपस्थितेः सहकारित्वानुरोधेन [redacted] अभेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसर्गावच्छिन्नघटत्वावच्छिन्नप्रकारकद्रव्यघटे त्वावच्छिन्नविशेष्यकशाब्दबोधं प्रतितत्संबंधावच्छिन्नतद्
र्मावच्छिन्नकेप्रेरकद्रव्यत्वाद्यवच्छिन्नविशेष्यकयोग्यताज्ञानस्यापि समवायसंबंधेनैव हेतुत्वापत्त्या पुरुषो
पेक्षयाऽनंतधर्मितावच्छेदकभेदेन कार्यकारणभावप्रसंगेन महागौरवात्॰ धर्मितावच्छेदकता संबंधेन का
र्यकारणभावे तु धर्मितावच्छेदकानिवेशेन लाघवात्॰ न च प्रकारता संबंधेन पदार्थोपस्थितेर्हेतुत्वे घटो द्रव्यं घ
टः प्रमेयः घटः पदार्थ इत्यादि घटैकैकस्थले पुरुषभेदेनानंतकार्यकारणभावप्रसंगस्तदपेक्षया समवायसंबंधे
न पदार्थोपस्थितेर्योग्यताज्ञानस्य च हेतुत्वं स्वीकृत्य घटो द्रव्यमित्यत्र योग्यताज्ञानेऽनंतधर्मितावच्छेदकप्र
वेशेपि लाघवमक्षुण्णमेवेति वाच्यं॰ घटो द्रव्यं पटो द्रव्यमित्यादौ घटैकैकप्रकारकस्थलेऽनंतधर्मितावच्छेदकनि नंत ७
वेशेन महागौरवादिति चेन्न॰ घटो द्रव्यमित्यादौ घटपदशक्यं द्रव्यं मठपदशक्यं द्रव्यमित्याकारकद्रव्यत्वाव
च्छिन्नविशेष्यकवृत्तिज्ञानजन्यद्रव्यत्वा[illegible]वच्छिन्नविशेष्यकोपस्थित्या शाब्दबोधानुसत्याम आनुपूर्वीघट
कातावच्छेदकरूपावच्छिन्नविषयतानिरूपितवृत्तिविषयतानिरूपितद्रव्यत्वाद्यवच्छिन्नविशेष्यताकज्ञानजन्य
द्रव्यत्वाद्यवच्छिन्नोपस्थितेर्द्रव्यत्वावच्छिन्नविशेष्यकशाब्दबोधं प्रति हेतुत्वं वाच्यं॰ एवं च घटो द्रव्यमित्यत्र द्रव्यपद
वृत्तिज्ञानजन्योपस्थितिः घटो मठ इत्यत्र मठपदवृत्तिज्ञानजन्यद्रव्यत्वावच्छिन्नोपस्थितिः कारणमित्युक्तिपरस्य
रव्यभिचारवारणाय कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशेन प्रतिपदं पुरुषभेदेनानंतकार्यकारणभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वप्रसंगेनमहागोरथात्·

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीः। अत्रेदं बोध्यं। द्रव्यत्वावच्छिन्नविशेष्यक घटप्रकारकशाब्दबोधो जायतामितिइच्छासत्वे पर्वते वह्न्य
नुमितिसामग्रीसत्वे तादृशसामग्रीबलात् द्रव्यत्वावच्छिन्नविशेष्यकघटप्रकारकशाब्दबोधो जायते
न तु प्रमेयत्वावच्छिन्नविशेष्यक घटप्रकारकशाब्दबोधो जायतामितीच्छासत्वे पर्वते वह्न्यनुमिति
सामग्रीसत्वे द्रव्यं घट इत्याकारकशाब्दबोधो जायते। अतः द्रव्यत्वावच्छिन्नविशेष्यकघटप्रकारकशा
ब्दबोधं प्रति द्रव्यत्वावच्छिन्नविशेष्यकघटप्रकारकशाब्देच्छाविरहविशिष्टपर्वतधर्मिकवह्न्यनुमिति
सामग्रीप्रतिबंधिकातदभावः कारणं। एवं प्रमेयत्वावच्छिन्नविशेष्यकघटप्रकारकशाब्दबोधं प्रति
प्रमेयत्वावच्छिन्नविशेष्यकघटप्रकारकशाब्देच्छाविरहविशिष्टपर्वतधर्मिकवह्न्यनुमितिसामग्रीप्रतिबं
धिकातदभावः कारणं। पर्वते वह्न्यनुमितिसामग्रीत्वं पक्षताविरहविशिष्टपर्वतधर्मिकवह्निव्याप्यधूमव
त्तापरामर्शरूपा। तस्या विशेष्यतावच्छेदकत्वं तु पर्वतत्वे द्रव्यं घट इति शाब्दबोधस्य तु विशेष्यतावच्छेदकता
द्रव्यत्वेऽस्तीति विशेष्यतावच्छेदकतासंबंधेन घटप्रकारकशाब्दबोधं प्रति विशेष्यतावच्छेदकतासंबंधावच्छिन्न
प्रतियोगिताकसामग्र्यभावः कारणमिति वक्तुं न शक्यते। किंतु समवायसंबंधेनैव घटप्रकारकद्रव्यत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वछिन्नविशेष्यकशाब्दबोधं प्रति तादृशशाब्देच्छाविरहविरहविशिष्टपर्वते वन्हेः पक्षताविशिष्टपर्वतधर्मिकवान्हि
व्याप्यधूमवत्तानिश्चयरूपसामग्र्याः समवायसंबंधावछिन्नप्रतियोगिताकाभावः कारणमिति अवश्यं वाच्यं तथा
चायं कार्यकारणभावो धर्मितावछेदक द्रव्यत्वादिभेदेन भिन्नः एवं च द्रव्यत्वावछिन्नविशेष्यकघटप्रकारकशा
ब्देच्छाविरहविशिष्टपर्वतधर्मिकवन्ह्यनुमितिसामग्रीसत्वे यथा प्रमेयत्वावछिन्नविशेष्यकघटप्रकारकशा
ब्देच्छाविरहविशिष्टपर्वतधर्मिकवन्ह्यनुमितिसामग्र्यभावरूपकारणात् प्रमेयत्वे घटप्रकारकशाब्दबोधो धर्मि
मितावछेदकतासंबंधेन जायते तथा द्रव्यत्वावछिन्नविशेष्यकघटप्रकारकशाब्देछां विनापि तादृशकारणातो
द्रव्यत्वे धर्मितावछेदकतासंबंधेन शाब्दबोधः कुतो न जायते अतः समवायसंबंधेन घटप्रकारकद्रव्यत्वावछिन्न
विशेष्यकशाब्दबोधं प्रति समवायसंबंधेन घटप्रकारकद्रव्यत्वावछिन्नविशेष्यकयोग्यताज्ञानं समवायसं
बंधावछिन्नप्रतियोगिताकतादृशसामग्र्यभावो देशिकविशेषणतासंबंधेन कारणं तयोश्च परस्परं सहकारि
ता एवं प्रमेयत्वावछिन्नविशेष्यकघटप्रकारकशाब्दबोधस्थले पि एवं च एकधर्मावछिन्नविशेष्यकघटप्र
कारकशाब्देछातो नान्यधर्मावछिन्नविशेष्यकघटप्रकारकशाब्दबोधोत्पत्तिः भिन्नविषयकानुमितिसामग्रीकाले उत्प
द्येत तथा च घटत्वावछिन्नविशेष्यकघटप्रकारकशाब्दबोधस्य कस्यापि कार्यतावछेदकानाक्रांततया न तस्या
पत्तिरिति विशेष्यतावछेदकतासंबंधेन घटप्रकारकशाब्दबोधं प्रति घटत्वभेदेन कारणत्वकल्पनं विफलमेव • राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याघटप्रकारकत्वनिष्ठावच्छेदकतानिरूपिता

अत्रवदंति विशेष्यतावच्छेदकतासंबंधेनघटप्रकारकशाब्दबोधं प्रति अभावः कारणं· कारणतावच्छेदकसंबंधश्चस्वी
यवन्हिसामग्रीत्वावच्छिन्नायाप्रतियोगितातान्निरूपितायाऽभावनिष्ठावि~~च्छेदकता~~च्छेदकतासामानाधिकरण्य
संबंधावच्छिन्नातदाश्रयीभूतोयोऽभावस्तान्निरूपितायाइच्छात्वावच्छिन्नप्रतियोगितातान्निरूपितायाविष
यित्वनिष्ठावच्छेदकतातन्निरूपितत्वनिरूपितत्वसंबंधावच्छिन्नशाब्दबोधनिष्ठ~~विशेष्यत्व~~ावच्छेदकतातन्निरूपिताया
विशेष्यत्वनिष्ठावच्छेदकतातन्निरूपितायाऽवच्छिन्नत्वनिष्ठावच्छेदकतातन्निरूपितावच्छेदकतासंबंधः त
थाच द्रव्यत्वावच्छिन्नविशेष्यकघटप्रकारकशाब्देच्छाविरहविशिष्टपर्वतधर्मिकवन्ह्यनुमितिसामग्र्यभा
यत् वत्स्वपं कारणं ~~त~~तत् एतादृशसंबंधेनद्रव्यत्वेऽपिवर्त्तते तेननुप्रमेयत्वादौ· एवं प्रमेयत्वावच्छिन्नविशेष्यकघटप्रकारक
शा इच्छाविरहविशिष्टपक्षताविशिष्टवन्ह्यनुमितिसामग्र्यभाव उक्तपरंपरासंबंधेन प्रमेयत्वेऽपिवर्त्तते त
थाच प्रमेयत्वे एतादृशाभावसत्वे द्रव्यत्वे एतादृशाभावासत्वेनधर्मितावच्छेदकतासंबंधेनघटप्रकारकशा
ब्दबोधापत्तिः निरस्तयोग्यताज्ञानबलात्·

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशोप
स्थिते

परपदज्ञाप्यं द्रव्यमिति वृत्तिज्ञानजन्योपस्थितेः पूर्वोक्तसंबंधेन द्रव्यत्वेसत्त्वेन घटो द्रव्यमिति वाक्याच्छाब्दबो
धापत्त्याः स्वजनकज्ञानीयतत्पदवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेनैव
हेतुत्वं वाच्यं तत्पदघटितवाक्यविशेषे तत्पदार्थज्ञानयोः परस्परं सहकारित्वं च वाच्यं एवं चान्यविधतास्व
यंज्ञातादन्यपदवृत्तिज्ञानजन्योपस्थितिकाले न शाब्दबोधापत्तिः कारणतावच्छेदकसंसर्गतावच्छेदककोटौ
टौ तत्पदनिवेशे च एकपदवृत्तिज्ञानजन्योपस्थितितो बोधोत्पत्तौ अन्यपदवृत्तिज्ञानजन्योपस्थितेरसत्त्वेन
व्यभिचारात् द्रव्यं वा हेतोन्तरत्वं कार्यं तावच्छेदककोटौ निवेश्यं एवं चापि एकैकपदवृत्तिज्ञानजन्यपदार्थो
पस्थितेः सहकारित्वासंभवेन तादृशात्पदार्थोपस्थित्यन्यतमसहकारेणैव योग्यताज्ञानस्य शाब्दबोधजनक
त्वं बोध्यं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तात्पर्यज्ञानेन गतार्थत्वात्

ननु योग्यताज्ञानस्य धर्मितावच्छेदकताप्रत्यासत्त्याहेतुत्वेपि आकांक्षाज्ञानस्य तादृशसंसर्गेण हेतुत्वासंभवेन घटत्वा
वच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारकद्रव्यत्वावच्छिन्नविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति समवायसंबंधेन घटो
द्रव्यमित्याकांक्षाज्ञानत्वेन कारणता वाच्या । एवं चैतादृशाकांक्षाज्ञानविरहकालीनघटपदोत्तरसुपदोत्तरप्रमेय
पदोत्तरसुपदत्वरूपानुपूर्वीज्ञानकालीनयोग्यताज्ञानेन प्रमेयत्वेन शाब्दबोधोत्पत्त्या तादृशाकांक्षाज्ञानस्य सहका
रित्वासंभवेन तद्विरहकाले द्रव्यत्वेन शाब्दबोधापत्तिरिति चेन्न । आकांक्षाज्ञानस्य स्वातंत्र्येणाहेतुत्वात्तात्पर्यज्ञानस्य
च विषयताप्रत्यासत्त्याहेतुत्वात् । तथा हि घटप्रकारकधर्मितावच्छेदकतासंबंधेन शाब्दबोधं प्रति घटो द्रव्यमित्या
तोच्छवित त्वविषयता निरूपित ७ द्याकारकवाक्यविशेष्यतानिरूपितेच्छाविषयतानिरूपिताया घटप्रकारकत्वविषयतानिरूपितबोधविषयता
तन्निरूपितविशेष्यत्वे च विषयतानिरूपितावच्छिन्नत्वविषयतानिरूपितावच्छेदकत्वविषयतानिरूपिताधेयत्वसं
बंधावच्छिन्नविषयतासंबंधेन तात्पर्यज्ञानं कारणं ~~मिति~~ [redacted] । एवं घटः प्रमेय इत्यादिस्थले भिन्नं तात्पर्यज्ञानं कार
णमिति । न च परस्परं व्यभिचारवारणाय व्यवहितोत्तरत्वनिवेशे फलयोर्व्याप्यव्यापकभावेन तात्पर्यज्ञान भावा १
स्य सहकारित्वासंभव इति वाच्यं । तावता तात्पर्यज्ञानान्यतमसहकारेण योग्यताज्ञानस्य शाब्दबोधजनकत्वात् । ए
वं स्वजनकज्ञानीयवृत्तिप्रकारतानिरूपितविशेष्यतावच्छेदकता विशिष्टप्रकारतासंबंधेन उपस्थिते हेतुत्वेपि

व्याप्यव्यापकभावाभावेपि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.01.20 15:31
,TRANSFERRED=2020/01/22 at 15:40:01
,PAGES=41
,TYPE=STD
,NAME=S0002623
,Book Name=M-2458-KARTIK MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection